www.thearyasamaj.org

जून २०१६ ईसवीयाब्दः ओ३म् R.N.I.Regd. No. UPBIL/1998/1485

ज्वालापुरीय - गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

भारतोदयः

'भारते भातु भारती'

# सहस्रचिन्त्य-चरितम्

-डॉ. रामकिशोरमिश्रः
पूर्वोपाचार्यः संस्कृतविभागाध्यक्षश्च
महामना-मालवीय-महाविद्यालयः, खेकड़ा
बागपत-२५०१०१ (उत्तरप्रदेशः)

(१)

सहस्रचिन्त्यो राजाऽभवत्, कैकेय-देशे पुरा ।
स्वेष्ट-देवं पश्यति स्म, स प्रजा-पशु-पक्षिषु ॥

(२)

स प्रातः समयं नित्यं, स्वभगवतः पूजया ।
भक्त्या च यापयति स्म, धर्मशास्त्र-पाठेन च ॥

(३)

राज-सभायां मध्याह्ने, न्यायं हि करोति स्म सः ।
सायं वेषं परिवर्त्य, सेवायै गच्छति स्म सः ॥

(४)

वृद्धान् रुग्णान् सेवते स्म, कारयति स्म भोजनम् ।
गोशालायां च घासं गाः, खादयति स्म सादरम् ॥

(५)

रात्रौ च भवनं प्राप्य, श्वपिति स्म पत्न्या सह ।
अकस्माद् विरक्तो भूत्वा, स पुत्राय राज्यं ददौ ॥

(६)

वनं गतस्तपस्यायै, कृतवान् कठोरं तपः ।
स्वप्ने च दत्तवान् तस्मै, यमराजः स्वदर्शनम् ॥

(७)

तेनोक्तं राजन्! लोकेऽस्मिन्, प्रजा-सेवा त्वया कृता ।
अत इहलोकं त्यक्त्वा, स्वर्गलोकमितश्चल ॥

(८)

जीवन-मरण-बन्धनात्, स मुक्तः स्वर्गं ययौ ।
रामकिशोर-मिश्रेण प्रोक्त-विषयो वर्णितः ॥

www.thearyasamaj.org

दूरभाष: - ०९२१९४०६०७८
०९२१९४०६०७४

# भारतोदय:

**संस्कृत - मासिकपत्रम्**

वर्षम् - १०६ अङ्कः - १२

*सम्पादक:*
**डॉ. हरिगोपालशास्त्री**
*व्याकरणाचार्य:*
*एम.ए., पीएच. डी.*
**राष्ट्रपति-पुरस्कृत:**

*सह - सम्पादक:*
**डा.केशवप्रसाद उपाध्याय:**
*साहित्याचार्य:*
*एम.ए., पीएच. डी.*

*प्रबन्ध - सम्पादक:*
**डॉ. अजयकौशिक:**
*साहित्याचार्य:*
*एम.ए., पीएच. डी.*

*प्रकाशक:*
गुरुकुलमहाविद्यालय: ज्वालापुरम्
*हरिद्वारम्-२४९४०४*
*(उत्तराखण्ड-प्रदेश:)*

**शुल्क - विवरणम्**

| | |
|---|---|
| प्रत्यङ्कम् | ५/- |
| वार्षिकम् | ५०/- |
| आजीवनम् | ५००/- |

## विषयानुक्रमणिका


| | | |
|---|---|---|
| १. श्रुति-सुधा | -महर्षिदयानन्दसरस्वती | ०३ |
| २. विद्योत्तमा (५) | -डॉ. आचार्यरामकिशोरमिश्र: | ०४ |
| ३. शुभकामना: | -डॉ. शैलेशकुमार-तिवारी | ०८ |
| ४. अमरीका भवेद् दूर: | -डॉ. प्रशस्यमित्रशास्त्री | ०९ |
| ५. पण्डित-जवाहरलालनेहरु-महाभागस्य जीवन-दर्शनम् (शोधपत्रम्) | -डॉ. केशवप्रसादगुप्त: | १० |
| ६. त्रिपथगा (काव्यम्) | -डॉ. प्रकाशचन्द्र: पन्त: 'दीप:' | १४ |
| ७. निशां कथं नयेयम् | -डॉ. वेदकुमारी | १५ |
| ८. कालिदास-काव्येषु पर्यावरण-संरक्षण-चिन्तनम् (१) | -डॉ. प्रकाशचन्द्र: पन्त: 'दीप:' | १६ |


राष्ट्रियसंस्कृतसंस्थानस्य अनुदान-साहाय्येन प्रकाशितम्
भारतोदय: ( संस्कृत-मासिकम् )
( RNI Regd. No. UPBIL/1998/1485 )

| | |
|---|---|
| १. प्रकाशनस्थानम् | ज्वालापुरम्, हरिद्वारम् (उत्तराखण्डम्) |
| २. प्रकाशनकालावधि: | मासिकम् |
| ३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य, सम्पादकस्य नाम, नागरिकता च | डा. हरिगोपालशास्त्री, भारतीय: गुरुकुलमहाविद्यालय: ज्वालापुरम् पत्रालय:- गुरुकुल काङ्गड़ी, हरिद्वारम्-२४९४०४ (उत्तराखण्डम्) |
| ४. पत्राधिकारिणां नाम्ना सह सङ्केत: | ज्वालापुरीय-गुरुकुलमहाविद्यालय-सभा, ज्वालापुरम्, पत्रालय: - गुरुकुल काङ्गड़ी हरिद्वारम्-२४९४०४ (उत्तराखण्डम्) |

डा. हरिगोपालशास्त्री इति नामाहं समुद्घोषयामि, यदुपरि लिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति।

-डॉ. हरिगोपालशास्त्री

www.thearyasamaj.org

ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

# भारतोदयः

भविक-भरित-भारतोदयोऽयं भव-विभवोद्भव-भावनाभिलाषी ।
भगवति भुवि भक्ति-भाव-भाजां भव-भय-भाव-भरं भ्रियान्नभूमन् ॥

× × ×

निशम्यतां लेख-ललाम-सञ्चय-प्रकाशने येन कृतोऽतिनिश्चयः ।
गृहीतसद्धर्मविशेषसंश्रयश्चकास्ति सोऽयं भुवि 'भारतोदयः' ॥

| वर्षम्- १०६ | आषाढः २०७१ विक्रमाब्दः ✱ जून २०१६ ईसवीयाब्दः | अङ्कः-१२ |
|---|---|---|

## ✱ श्रुति-सुधा ✱

ओ३म् स पर्वतो न धरुणेष्वच्युतः सहस्रमूतिस्तविषीषु वावृधे ।
इन्द्रो यद्वृत्रमवधीन्नदीवृतमुब्जन्नर्णांसि जर्हृषाणो अन्धसा ॥

-ऋग्वेदः १/१०/५२/२

पदार्थः -

(सः) पूर्वोक्तः (पर्वतः) मेघः (न) इव (धरुणेषु) धारकेषु वाय्वादिषु (अच्युतः) अक्षयः (सहस्रमूतिः) सहस्रमूतयो रक्षणादीनि यस्मात्, सः (तविषीषु) बलयुक्तेषु सैन्येषु (वावृधे) अतिशयेन वर्द्धते (इन्द्रः) सूर्यः (यत्) यः (वृत्रम्) मेघम् (अवधीत्) हन्ति (नदीवृतम्) नदीभिर्वृतो युक्तो नदीर्वर्त्तयति वा, तम् (उब्जन्) आर्जवं कुर्वन्, अधो निपातयन् वा (अर्णांसि) जलानि (जर्हृषाणः) पुनः पुनर्हर्षं प्रापयन् (अन्धसा) अन्नादिना ॥२॥

भावार्थः -

यो मनुष्यः सूर्यवत् सेनादि-धारणं कृत्वा मेघवत् शत्रून् हत्वाऽन्नादि-सामग्र्या सह वर्त्तमानो बलानि वर्धयति, स गिरिवत् स्थिरसुखः सन् राज्यं वर्द्धयितुं शक्नोति ॥२॥

-महर्षिदयानन्दसरस्वती

[ऋग्वेदभाष्यम्, तृतीयो भागः, २२ पृष्ठे ]

www.thearyasamaj.org



# विद्योत्तमा (५)

–डॉ. आचार्यरामकिशोरमिश्रः
पूर्वोपाचार्यः संस्कृविभागाध्यक्षः
महामना–मालवीय–महाविद्यालयः,
खेकड़ा, बागपत (उ.प्र.)

'राजन्! कविना पत्नी–त्यागपत्रे यल्लिखितं, तदनुसारमियं विद्योत्तमा तस्य विवाहित–पत्नी वर्तते, परमनया स्वकार्य–सम्पर्कस्तेन सह कदापि न स्थापितः। अतः सा तस्य त्याज्यैव।' इति सभासदां वचनमाकर्ण्य विद्योत्तमा तार–स्वरेण प्रोवाच–

शृणुत हि कर्णधारमुख्यानां,
कर्णाः! वदत मुखानि।
अन्यायोऽयं नरस्य नारीं प्रति,
किमहं करवाणि॥
राजसभायां स्थितः कविः स्वीकुरुते न सत्यताम्।
इतो मे राम! विलोकय माम्॥

सभासद्– मैवं वद बाले!

राजसभेयं विक्रमस्य सा या न्यायेन प्रसिद्धा,
देशे देशे नयैर्वैभवैर्धनादिकेन समृद्धा।
अस्याः ख्यातिः सरति सर्वतस्त्वं नो विस्मर ताम्।
वयं सत्यं कथयामस्त्वाम्॥

'राजकुमारि! कविना कालिदासेन पत्नी–त्यागविषये यत्किञ्चिदावेदितं तत्किं सत्यम्? स्वापक्षपोषणाय निस्सङ्कोचं वद।' इति राजवचनमाकर्ण्य विद्योत्तमा न्यवेदयत्–

तन्निखिलं यत्किञ्चित्कविना लिखितं सत्यमस्ति हे राजन्!।
मन्ये बुधं कविमिमं स्वपतिं कालिदासमज्ञं न तं परम्॥

विक्रमादित्यः –

न कालिदासः कविः केवलो,
राजकविरपि स राजपूजितः।
कविरयं हि मे सभा–भूषणं,
परमिममज्ञं कथं वदसि भोः?॥

राजन्! कवि–कालिदासमहं पतिं मन्ये, किन्तु मूर्ख–कालिदासं न। अद्याऽयं कविर्विद्वांश्च वर्तते, परं पूर्वमयं मूर्ख आसीत्। यद्यहं तस्यां मेलन–निशायामेनं भूतपूर्व–मूर्खं कालिदासं पतित्वेनाऽग्रहीष्यम्, तदयमद्य कविर्नाऽभविष्यत्। वार्तालापेनाऽस्य मूर्खत्वं ज्ञात्वाऽहमेनं बुधी–कर्तुं भर्त्सनया सह शयन–कक्षान्निरसारयम्। अहं पतिहितमैच्छं महाराज!

हितस्य भावनया तदाचरम्,
येनाऽज्ञादयमभूत् कविर्ज्ञः।
वचनमस्तु चेदनृतं मे नृप!,
तदहं दण्ड्या, पृच्छ कविमिदम्॥

कविवर! विद्योत्तमया यदुक्तं तत्किं सत्यम्? आ महाराज! विद्योत्तमा–कथनं पूर्णतया सत्यमस्ति। तस्याः भर्त्सनयाऽहं विद्वान् कविश्चाऽभवमिति कवि–वचनं श्रुत्वा राज्ञा घोषणा कृता –

www.thearyasamaj.org

भो: ! सांसद-वर्या: शृण्वन्तु,
कथितं द्वयोरसत्यं नास्ति ।
तद् द्वावपि पतिपत्न्यौ मन्ये,
स्वीकृतो न कवि-पत्नीत्याग:॥

... ... ... ...

कविना स्वैर्वक्तव्यै: सम्प्रति,
विद्योत्तमा स्वीकृता पत्नी।
वियोग-काले कृत: केनचिद् ,
विवाहान्तरो नैव स्वेच्छया ॥

सभासद: -

वरं महाराज! वरम्।
निष्पक्षोऽयं भवतो न्यायो,
येन पयोदुग्धे पृथक्कृते।
यथा प्रकृत्या सम्मिलितस्ते,
पतिपत्न्यावपि तथा महीप!॥

विक्रमादित्य: -

कविवर! विद्योत्तमा तव पत्नी वर्तते। एनां मम निर्णयानुसारमङ्गीकुरु। शृणु-

विश्वासं कुरु खलु कथयामो राजसुताया वचनात्,
कवे! पतिं मन्यते त्वामियं परं किमन्यत् कथनात् ।
युवयोर्द्वयोर्मिथुनता लोके स्वस्थानं लभताम्,
वयं सत्यं कथयामस्त्वाम् ॥

राजन्! भवदादेशमहं मन्ये। परमेषा पत्नी विद्योत्तमाऽपि भवताऽनुशासनीयेति कविवचो निशम्य 'विद्योत्तमे त्वमपि पतिमनुनय, मधुर-गिरा च प्रसादय, येन द्वयोरत्र सुखद-सम्मेलनं भवेद्' इति नृप आदिदेश।

विद्योत्तमा -

कविवर!

(१)

त्वं मे पतिर्भार्याऽहं ते स्खलितं कृत क्षमस्व,
नमामि, चरणौ स्पृशामि ते प्रिय! दयस्व मयि च रमस्व।
मामिच्छसि चेद्, गेहं नय मां, स्वीकुरु मे रतिधाम!,
इतो मामवलोकय मे राम !॥

कालिदास: - राजपुत्रि!

(२)

अहं पतिस्ते त्वं मे पत्नी, कामोऽहं च त्वं रति: ,
त्वं मे प्रिय-कल्पना कविरहं मार्गोऽहं च त्वं गति: ।
मम जीवन-सहचरी त्वमसि ते स्वीकरोमि रतिधाम!,
प्रिये! त्वं चल गृहमनुसर माम् ॥

विद्योत्तमा- कविवर!

(३)

एको यस्यास्त्वमेव नाथो देवानामपि देव: ,
मनोमोदकैर्हृदय-मन्दिरे काम-सुमै: कृत-सेव:।
पत्नी स्वपतिं जयति गिरा शृणु पतिपत्नीचर्चाम्,
पश्य मामहमिच्छामि त्वाम् ॥

(४)

नानारूपस्त्वमसि तावकी रूपवती भार्याऽहम्,
व्यर्थं न स्यान्नौ सुयौवनं युवाऽसि युवती चाऽहम् ।
मिथुनत्वेन लभेथास्त्वं मामहं लभेय त्वाम्,
इतो मे राम! विलोकय माम् ॥

(५)

भारतस्य प्रतिकणं त्वावयो: रूपं निहितमस्ति तत्,
सांसारिक-विषयस्य जीवितं स्वरूपमुच्यते हि यत् ।
तदहं पत्नीषु स्वां लोके लोके पतिषु त्वाम्,
पश्य मामहमिच्छामि त्वाम् ॥

(६)

लक्ष्मीरहं प्राप्तये यस्या: बहुभि: कृत: प्रयत्न:,
सफलोऽभूदच्युतश्छद्मना तत्र स दैत्य-सपत्न:।

www.thearyasamaj.org

कपटं कृत्वा विवाहिताऽहं त्वयापि कपटिन् श्याम!,
इतो मामवलोकय मे राम! ।।

(७)

अनसूयाऽहं त्वमृषिरत्रिरसि, तव सेवां च करिष्ये,
ब्रह्माऽच्युत-शङ्करात्मकं ते गर्भमहं च धरिष्ये ।
लोकेऽहं सुत-रैवतीं निजां प्रिय! बलरामं त्वाम् ।
इतो मे राम! विलोकय माम् ॥

(८)

त्वं शङ्करो येन विधृताऽहं सा वसु-जननी गङ्गा,
जनकल्याणनिपीतगरलशमनायोत्ताल-तरङ्गा ।
नहि कथमद्य शिरसि धारयसे तां प्रिय! मां गङ्गाम्,
पश्य मामहमिच्छामि त्वाम् ॥

(९)

अहं द्रोपदी सत्वमर्जुनो येन बाण-सन्धानम्,
कृतं मातृवचसाऽकरोच्च यो मम भोगे फलमानम् ।
अद्य तमस्यसि कथं न बाणं काम-पूरणं काम!,
इतो मामवलोकय मे राम! ।।

(१०)

विस्मृतोऽसि किं तव गौः साऽहं या दुग्धा त्वया पुरा,
दुह्यन्ते कथमद्य नो त्वया तस्यास्ते पयोधराः ?।
वसुन्धरां मां रसम्भरामिह को नेच्छति दयिताम्,
पश्य मामहमिच्छामि त्वाम् ॥

(११)

कण्ठस्त्वमहं मधुरा वाणी, सिन्धुरहं त्वं तीरः,
अहं त्वदीयं शरीरमर्धं, त्वं मे प्राण-समीरः।
द्वयोरस्ति सम्बन्धः, पत्नी पश्यति तव पतितां[1],
इतो मे राम! विलोकय माम् ॥

(१२)

अहं सुभद्रा स त्वमर्जुनो येन कृतं मम हरणम्,
त्वं तस्याः प्रियपतिरसि मे च स्पन्दितमन्तःकरणम् ।
कथं नाऽद्य कुरुषे स्वपार्श्वगां हर्तुं तामिच्छाम्?,
पश्य मामहमिच्छामि त्वाम् ॥

(१३)

कमलानां रविरेकोऽनेकाः सन्ति तस्य कमलिन्यः,
तव नैका वध्वोऽपि सन्तु मे नाथो नास्ति त्वदन्यः।
माञ्च सनाथां न कुर्वनाथां[2], देहि कराश्रयताम् ।
इतो मे राम! विलोकय माम् ॥

(१४)

कामो दुरतिक्रमः परं प्रिय! सर्व इतस्तत्पाशम्[3],
त्यक्त्वा मां न गच्छ ह्यन्यस्याः कस्याश्चित्तु सकाशम् ।
पत्नीं पश्येन्नरः सकामो न तु नारीमपराम्,
पश्य मा महमिच्छामि त्वाम् ॥

(१५)

अहं वर्तिका त्वं मे दीपो निवसति यस्मिन् स्नेहः,
येन जीवनं लभते लोके शनैः शनैर्मम देहः ।
दीपक! सकलं जगत्प्रकाशय स्वस्मिन् धृत्वा माम्,
पश्य मामहमिच्छामि त्वाम् ॥

(१६)

त्वं सोऽर्थो यं वागनुधावति यथा स्मृतिर्वै वेदम्,
सूत्रं सदा स्फोटयति सिद्धं सर्वथा हि जन-भेदम् ।
अहं रोहिणी त्वं मे चन्द्रस्तदनुसरामि त्वाम्,
इतो मे राम! विलोकय माम् ॥

(१७)

ताराऽहं ते हरिश्चन्द्र! या काश्यां विक्रयं गता,
राज्यं पितरौ न्यस्य[4] धर्म-विभवं त्वां सा समागता।
अद्य कथन्न धर्म-रक्षायै विक्रीणीषे माम्,
पश्य मामहमिच्छामि त्वाम् ॥

---

१. पत्युर्भवतिस्तलि पतिता ताम् – पतिताम्= पतित्वमित्यर्थः।
२. कुरु+अनाथां यणि कुर्वनाथाम्।
३. इतः=गतः।
४. नि+अस्+ल्यप्=न्यस्य-त्यक्त्वा।

www.thearyasamaj.org

(१८)
अहं सुरा त्वं सुर प्रिय-कवे! मदिराऽहं त्वं पात्रम्,
अहमिन्द्राणी पतिस्त्वमिन्द्रः शोभाऽहं त्वं गात्रम्।
वचो नर्तिकीं कथं सभायां मां कुरुषे रम्भाम्?,
इतो मे राम! विलोकय माम्॥

(१९)
कथय देव! किमियं सीमान्तं गता न मे हि तपस्या?,
येन प्रसीदसि नैव, विचित्रा गतिर्मां विना कस्याः।
भूभृद्दुहिताऽहं भोः शङ्कर! कैलासं नय माम्,
पश्य मामहमिच्छामि त्वाम्॥

(२०)
त्वं नाथोऽसि तथापि स्यामहं किमनाथा सहिष्यसे?,
वसामि हृदये तव, मया विना किं कविता करिष्यसे?।
चिन्तनेन मे कविस्त्वमभवो न स्वीकुरुषे माम्?,
पश्य मामहमिच्छामि त्वाम्॥

(२१)
पुरूरवास्त्वं साऽहमुर्वशी या गगनादधो गता,
प्रेम्णा वशमागता भ्रमन्ती तं नीत्वा च स्वर्गता।
स इव सुन्दरीं समालोचयन् गतो न किन्नताम्?,
इतो मे राम! विलोकय माम्॥

(२२)
अहं कुमुदिनी कुमुद-करस्त्वं विकसय मे कुमुदाङ्गम्,
निशाकरस्त्वं त्वहं निशा सा, शोभय मे प्रियमङ्गम्।
तमो विनाशय शीतलकिरणैश्चन्द्र! प्रकाशय ताम्,
पश्य मामहमिच्छामि त्वाम्॥

(२३)
सा बलवती हिडिम्बाऽहं प्रिय! यस्या बलं धिक्कृतम्,
पूर्वं त्वया तद्वनं गत्वा ततो बलाद् वशीकृतम्।
भीम! भीमरूपं प्रदर्श्य तां कुरुषे किन्न निजाम्?,
इतो मे राम! विलोकय माम्॥

(२४)
लक्ष्मण! कथमागतोऽसि लक्ष्मीं त्यक्त्वा प्रासादे माम्,
या मनसा विह्वला प्रतिकणं पश्यन्ती प्राप्ता त्वाम्।
किं भ्रातुर्विक्रमस्य भीत्याऽऽगच्छसि न तूर्मिलाम्,
पश्य मामहमिच्छामि त्वाम्॥

(२५)
अहं त्वदीया विभा विभुस्त्वं मया पृथक्का शोभा?,
मेघग्रहैर्ग्रस्तभानोः सा यथा भासते नो भा।
तथा ग्रह-ग्रस्तस्य ते गता पत्नी न भासताम्,
इतो मे राम! विलोकय माम्॥

(२६)
यद्यहमस्या राजसभाया निर्यास्यामि निराशा,
तन्नो किं दुष्यन्त-समो मे करिष्यसे मेलाशाः?।
पश्चात्तापं प्राप्स्यन् हृदि मां नेष्यसि न स्मरताम्?,
पश्य, मामहमिच्छामि त्वाम्॥

(२७)
विद्वद्-युद्धे ते वचोरथो विषमगतो भवेद् यदा,
त्वया सङ्गता कील-स्थाने कैकेयी-समा तदा।
जीवन-चक्रेऽङ्गुलिं प्रदाय प्रिय! श्रयिष्ये त्वाम्,
इतो मे राम! विलोकय माम्॥

(२८)
यदि गृह्णीषे न मामकाले मृत्युर्मयि पतिष्यति,
ममेन्दुमत्या विरहेऽजस्य तु तव पातो भविष्यति।
अहं त्वदीया कला कलाधर! स्वस्मिन् मेलय माम्,
पश्य, मामहमिच्छामि त्वाम्॥

[ क्रमशः ]

www.thearyasamaj.org

# शुभ-कामना:

-डॉ. शैलेशकुमारतिवारी
सहायकाचार्य: (व्याकरणम्)
श्रीभगवानदास-आदर्शसंस्कृतमहाविद्यालय:
हरिद्वारम् ( उत्तराखण्डम् )

(१)

यदायुष्यवन्तो वसन्तीह नागा:,
नदा: निर्जरा: दिव्य-नद्यो नमस्या:।
यदायुर्युता भू-धरा भान्ति भूमौ,
तदायुष्यवन्तो भवन्तो भवन्तु ॥

(२)

सदा रीतिमन्त:, सदा नीतिमन्त:,
सदा प्रीतिमन्त:, सदा कीर्तिमन्त:।
सदा ऋद्धिमन्त:, सदा वृद्धिमन्त:,
सदा सिद्धिमन्तो, भवन्तो भवन्तु ॥

(३)

सदा शक्तिमन्त:, सदा भक्तिमन्त:,
सदा बुद्धिमन्त:, सदा शुद्धिमन्त:।
सदा युक्तिमन्त:, सदा भुक्तिमन्त:,
व्यथा-मुक्तिमन्तो, भवन्तो भवन्तु ॥

(४)

सुधा-पीतिमन्त:, सुधीगीतिमन्त:,
इहाभीतिमन्त:, सदाऽधीतिमन्त:।
सदा योगवन्त:[१], सुसंयोगवन्त: ,
शिवारोग्यवन्तो भवन्तो भवन्तु॥

(५)

सदा शान्तिमन्त:, सदा कान्तिमन्त:,
सदा दान्तिमन्त:, शुभक्रान्तिमन्त:।
सदा ज्ञानवन्त:, सुविज्ञानवन्त:,
अभिज्ञानवन्तो, भवन्तो भवन्तु ॥

(६)

सदा धर्मवन्त:, सदा कर्मवन्त:,
सदा शर्मवन्त:, दया-मर्मवन्त:।
सदा सौख्यवन्त:, सदा श्रौतवन्त:,
समैश्वर्यवन्तो, भवन्तो भवन्तु ॥

(७)

सदा शौर्यवन्तो, हृदौदार्यवन्त:,
सदा धैर्यवन्त:, शुभ-स्थैर्यवन्त:।
सदा पुष्टिमन्त:, सदा तुष्टिमन्तो,
दया-दृष्टिमन्तो, भवन्तो भवन्तु ॥

(८)

हरौ दत्त-चित्तस्य चित्तं हरन्तो,
निजं सर्वलक्ष्यं मुदा साधयन्त:।
प्रजाहृत्सुमारण्यमध्ये भ्रमन्त:,
सदानन्द-सिन्धौ तरन्तो भवन्तु ॥

१. सदा भोगवन्त:।

www.thearyasamaj.org

# ❋ अमेरीका भवेद् दूरः ❋

-डॉ. प्रशस्यमित्रशास्त्री
पूर्वसंस्कृतविभागाध्यक्षः
फीरोज-गाँधी-स्नातकोत्तर-महाविद्यालयः
रायबरेली (उत्तरप्रदेशः)

(१)
अध्यापकस्तु कक्षायां, छात्रान् अध्यापयन् यदा ।
प्रश्नमेवं प्रकुर्वाणः, सर्वेषां पुरतोऽब्रवीत् ॥

(२)
दूरस्थो वर्त्तते सूर्यो, देशो वाऽयम् अमेरिका ।
उभयोस्तुलनायां च, को वै दूरतरो भवेत् ?

(३)
गुरोस्तद् वचनं श्रुत्वा, कश्चित् छात्रस्तु तत्क्षणम् ।
विचारमग्नतां तावत्, नाटयन् गुरुमाह यत् ॥

(४)
गुरो! मम विचारे तु, सूर्योऽयं निकटस्तथा ।
सुदूरश्चाऽमेरीका तु, सर्वथा वर्त्तते यतः ॥

(५)
सूर्यो दृष्टिपथे नित्यं, सर्वदैव भवेन्मम ।
परं देशोऽमेरीका तु, न दृष्टि-पथमागतः ॥

●

(९)
सदा क्षान्तिमन्तः, सदा ख्यातिमन्तः,
सदा वृत्तिमन्तः, सदा स्वस्तिमन्तः।
सुसद्-वंशवन्तश्च सौभाग्यवन्तः,
सुहृद्-बन्धुमन्तो, भवन्तो भवन्तु ॥

(१०)
प्रभोः स्पृष्टिमन्तो, गुण-श्लिष्टिमन्तः,
कृपा-वृष्टिमन्तः, सदा हृष्टिमन्तः।
सदा सत्त्ववन्तश्च सत्सङ्गवन्तः,
सदाचारवन्तो, भवन्तो भवन्तु ॥

(११)
सदा प्रौढिमन्तः, समुत्कर्षवन्तः,
समस्निग्धिमन्तो, लभाराजिमन्तः।
कला-वेद-शास्त्रादि-विद्या-विशिष्टाः,
शुभावाप्तिमन्तो भवन्तो भवन्तु॥

(१२)
सदाऽऽराध्यदेवानुकम्पा-प्रयोज्यो,
महासौख्य-सौभाग्य-शान्त्यादिरूपः।
वसन्तः स्थिरः स्यात्, सदा तद् वसन्ते,
वसन्तो भवन्तो हसन्तो लसन्तु ॥

●

www.thearyasamaj.org



# ❁ पण्डित-जवाहरलालनेहरु-महाभागस्य जीवन-दर्शनम् ❁

-डॉ. केशवप्रसादगुप्तः, शास्त्र-चूड़ामणिः
श्रीहुबलाल-आदर्श-संस्कृत-महाविद्यालयः
भरवारी, कौशाम्बी (उत्तरप्रदेशः)

महा-प्रभूणां चरण-सञ्चरणाऽभिभूते महनीये भारतवर्षे काले-काले नैके महापुरुषाः स्वजन्मना देशस्य भुवं समलञ्चक्रुः। तेषु पं.जवाहरलालनेहरु-महाभाग एको महापुरुष आसीत्। को न जानाति निखिले जगतीतले तस्य महापुरुषस्य नाम।

महापुरुषोऽयं गङ्गा-यमुनयोः सङ्गमे स्थिते तीर्थराजे प्रयाग-नगरे नवाशीत्युत्तराष्टादशतमे ख्रिष्टाब्दे नवम्बर-मासस्य चतुर्दश-दिनाङ्के(१४.११.१८८९) जन्म लेभे। **'आनन्द-भवनम्'** इति नामकं प्रसिद्धं भवनमद्यापि नगरेऽस्मिन् विराजते, यत्र महापुरुषोऽयं जातः। अधुना तद्भवनं **'स्वराज-भवनम्'** इति नाम्ना ज्ञायते।

जवाहरलालनेहरु-महाभागस्य जन्मैकस्मिन् सम्भ्रान्तेऽतिसम्पन्ने च कश्मीरी-वंशस्य सारस्वत-ब्राह्मण-परिवारेऽभवत्। अस्य पिता पं. मोतीलालनेहरु-महाभागः स्वसमयस्य महान् प्राड्-विवाक आसीत्। अस्य माता स्वरूपरानी-नेहरु-महाभागा धर्मशीला कर्त्तव्य-परायणा नारी चासीत्। पण्डितजवाहरलालनेहरु-महाभागः स्वपितुरेकाकी पुत्र एवासीत्।

अस्य महापुरुषस्य बाल्यावस्थाऽतिवैभव-सम्पन्ना सर्व-सुख-साधन-परिपूर्णा चासीत्। बाल्यकालादेवायं धीरः एवाभवत्। आङ्ग्ल-शिक्षिकाः शिक्षकाश्च तमपाठयन्। एकः समादृतो भारतीय-शिक्षकोऽपि तं हिन्दीं संस्कृतञ्च पाठयति स्म। एतदनन्तरं धनाढ्य-परिवारे जन्मकारणत्वात् पं. नेहरु-महाभागो विश्वस्य सर्वोत्तम-शिक्षण-संस्थासु विश्वविद्यालयेषु च शिक्षां प्राप्तवान्। तेन स्वकीयां विद्यालयी-शिक्षां **इंग्लैण्डदेशस्य 'हेरौ'** विद्यालयतः प्राप्तः। तस्योच्चशिक्षा च **कैम्ब्रिज-विश्वविद्यालयस्य 'ट्रिनिटी कालेज, लन्दन'** नाम-शिक्षण-संस्थायाम् अभवत्। तत्र स त्रि-वर्ष-पर्यन्तमध्ययनं कृत्वा प्रकृति-विज्ञाने स्नातकोपाधिं प्राप्तवान्। तदनन्तरे स **लन्दन-नगरस्य 'इनरटैपेल'**-संस्थायां द्विवर्षपर्यन्तं विधि-शास्त्रस्याध्ययनं कृत्वा परीक्षाञ्चोत्तीर्य **प्राड्-विवाको**पाधिना समलङ्कृतोऽभवत्।

पं. नेहरु-महाभागो द्वादशोत्तरैकोनविंशतितमे वर्षे (१९१२) भारतं समेत्य स्वपित्रा सह **प्रयाग-नगरे** प्राड्-विवाक-रूपे कार्यमारभत, परन्तु तस्मिन्

www.thearyasamaj.org

कार्ये तस्याभिरुचिर्नासीत्। षोडशोत्तरैकोनविंशति-शततमे वर्षे (१९१६) तस्य विवाह-संस्कारः **'कमला कौल'** इत्याख्यया भाग्यवत्या सहाभवत्। सा दिल्ली-निवासि-कश्मीरी-परिवारस्य कन्याऽऽसीत्। अस्मिन्नेव वर्षे स सर्वप्रथमं लखनऊ-अधिवेशने महात्मा-गान्धिनः सम्पर्के समागतः। सप्तदशोत्तरैकोनविंशति-शततमे वर्षे (१९१७) स महाभागः **'होम रूल लीग'** नामके संगठने सम्मिलितोऽभवत्। वस्तुतस्तु राजनीतौ तस्य पूर्ण-सान्निध्यं प्राप्तवान्। तस्मिन् समये महात्मागान्धिना **'रौलट'** अधिनियमस्य विरोधेऽभियानमेकं सञ्चालितम्। तेन सह नेहरु-महाभागोऽपि तस्मिन्नभियाने सहभागितां सक्रिय-रूपेण कृतवान्।

नेहरु-महाभागो महात्मा-गाँधिनो दैनिक-जीवनेन भृशं प्रभावितो जातः। तस्य समुपदेशानुसारेण सोऽपि स्वकीयं परिवारं सहजतायाः सरलतायाश्च पाठं प्रपाठयामास। तेन पाश्चात्त्य-वसनानि बहुमूल्य-वस्तूनि च परित्यक्तानि। तेन महाभागेन **खादी**-कुर्त्ता **गाँधीटोपी**ञ्चावधार्य भारतीय-वेशस्य परिचयः प्रदत्तः।

असहयोगान्दोलनेऽपि (१९२०-२२) सः सक्रिय-प्रतिभागितामकरोत्। तस्मिन्नेव काले सः सर्वप्रथमं कारागारं गतः। चतुर्विंशत्युत्तरैकोनविंशति-शततमे वर्षे (१९२४) स इलाहाबाद-नगरस्य नगर-निगमाध्यक्ष-पदे निर्वाचितः। तदनन्तरं सोऽखिलभारतीयकाङ्ग्रेस-समितेर्महासचिव-पदे सेवामकरोत्। नवविंशत्युत्तरैकोनविंशतिशततमे वर्षे (१९२९) काँग्रेसस्य वार्षिकाधिवेशनं लाहौर-नगरे समायोजितं, यस्मिन् नेहरु-महाभागोऽध्यक्षपदे नियुक्तः। अस्मिन्नेवाधिवेशने पूर्ण-स्वराजस्य प्रस्तावः प्रस्तुतीकृतः। त्रिंशत्युत्तरैकोनविंशतिशततमे वर्षे (१९३०) जनवरी-मासस्य षड्विंशतमे दिनाङ्के स **लाहौर**-नगरे स्वतन्त्रभारतस्य पताकामधूनोत्।

अस्मिन्नेव दिवसे समग्र-देशेऽपि **स्वराजदिवस-समारोहः** सोत्साहेन समायोजितः। तदनन्तरं महात्मा-गाँधिना सविनय-अवज्ञाऽऽन्दोलनस्याह्वानं कृतम्। नेहरु-महाभागो गान्धी-महोदयेन प्रचालिते शान्तिपूर्णे सक्रिये चास्मिन् आन्दोलने महत्त्वपूर्णं योगदानं कृतवान्।

पञ्चत्रिंशदुत्तरैकोनविंशतिशततमे वर्षे (१९३५) यदाऽऽङ्ग्ल-सर्वकारेण **भारताधिनयमः** पारितस्तदा नेहरु-महाभागेन काँग्रेसदलस्य कृते राष्ट्रव्यापिनमभियानं चालयामास। फलस्वरूपेण काँग्रेसदलस्याधिकांशतः प्रत्याशिनो विजयश्रीमलभन्त। षड्-त्रिंशदुत्तरैकोनविंशतिशततमे वर्षे (१९३६) काँग्रेसदलस्याध्यक्षपदे स निर्वाचितः। अस्मिन्नेव वर्षे स्वभार्यायाः कमला-नेहरोश्चिकित्सार्थे सः **स्विट्जरलैण्ड**देशं गतः। परन्तु दुर्भाग्यतस्तत्रैव सा दिवङ्गता। अग्रिमे वर्षेऽपि (१९३७) तेन काँग्रेस-दलस्याध्यक्ष-पदवी धारिता। द्विचत्वारिंशदुत्तरैकोनविंशतिशततमे वर्षे (१९४२) **'त्यजन्तु भारतम्'**(भारत छोड़ो)-नामके विशालान्दोलने स कारागारं प्रेषितः। पञ्चचत्वारिंशदुत्तरैकोनविंशतिशततमे वर्षे (१९४५)

www.thearyasamaj.org

स कारागाराद् मुक्तोऽभवत्। सप्तचत्वारिंशदुत्तरैकोनविंशतिशततमे वर्षे (१९४७) भारतपाकिस्तान-देशयो: स्वतन्त्रताया: काले आङ्ग्ल-शासकै: सह महत्त्व-पूर्णायां वार्तायां तेन भारतस्य प्रतिनिधित्वं कृतम्।

सप्तचत्वारिंशदुत्तरैकोनविंशतिशततमे वर्षे (१९४७) **अगस्त**मासस्य पञ्चदशदिनाङ्के भारतं **स्वतन्त्रता**मप्राप्नोत्। तदा प्रधानमन्त्रि-पदस्य कृते काँग्रेस-दले मतदानमभवत्। मतदाने सर्वाधिकं मतं सरदार-बल्लभभाईपटेलस्य पक्षे गतम्। स्थानं द्वितीयं आचार्यकृपलानीपक्षेऽभवत्। परन्तु नेहरु-महाभागस्य विश्वज्ञानेन गाँधि-महोदयो भृशं प्रभावित आसीत्। स्वतन्त्रता-प्राप्त्यन्तरं **महात्मागाँधी** नेहरु-महाभागमेव **प्रधानमन्त्रि**पदे समासीनं द्रष्टुमिच्छति स्म। अत: तस्य प्रेरणया **प्रधान-मन्त्रि**पदं पं.जवाहरलालनेहरु-महाभागाय प्रदत्तम्। नेहरु-महाभाग: स्वतन्त्र-भारतस्य प्रथमप्रधान-मन्त्रिपदमलङ्कृतवान्।

स्वतन्त्रता-प्राप्त्युपरान्ते समस्तान् भारतीय-जनानेकस्मिन् ध्वजान्तर्गत स्थापनमेव महती ज्वलन्त-समस्याऽऽसीत्। प्रधान-मन्त्रिणाऽस्या: समस्याया: निदानमतिकुशलतया कृतम्। तेन भारतस्य बहुमुखी-विकासस्य हेतो**र्योजनाऽऽयोग**स्य गठनमपि कृतम्। प्रौद्योगिकीय-क्षेत्रे कृषिक्षेत्रे च तेन महाभागेन महत्त्वपूर्णो विकास: कृत:। पञ्चवर्षीय-योजनानामपि शुभारम्भो देशेऽभवत्। तस्य नीतीनां फलस्वरूपेण भारते नूतन-युगस्यारम्भोऽभवत्। नेहरु-महाभागेन भारतस्य विदेश-नीतौ विकास-शीला प्रमुखा च भूमिकाया: निर्वहणं कृतम्। शिक्षा-क्षेत्रेऽपि तेन कृतं योगदानं सर्वथाऽविस्मरणीयम्।

पण्डितनेहरु-महाभागेनोपनिवेशवादस्य समाप्त्यर्थं गुटनिरपेक्षान्दोलनं चालितम्। तस्मिन् काले एशियाऽफ्रीका-महाद्वीपयोरुनिवेशवादस्य महती समस्याऽऽसीत्। कोरियाई-युद्धस्य समापने, स्वेज-नहर-विवादस्य समाधाने, काँग्रेस-समस्याया: निराकरणेऽन्ये चान्ताराष्ट्रिय-विवादानां परिशमने भारतस्य प्रधानमन्त्रिण: प्रमुखभूमिकाऽऽसीत्। **पश्चिमबर्लिन-आष्ट्रिया-लाओस**-प्रभृतिषु देशेषु प्रसृतानां विवादानां निर्णये तस्य विशद-योगदानमासीत्। नेहरु-महाभाग: स्वकीय-बहुमुखी-व्यक्तित्व-कारणात् पञ्चपञ्चाशदुत्तरैकोनविंशति-शततमे वर्षे (१९५५) भारतरत्न-सम्मानेन सभाजित:। शान्तिप्रियस्य तस्य महाभागस्य यथा भारते समादरोऽभवत्, तथा विदेशेष्वपि। यतोहि विवाद-ग्रस्त-विषयाणां निर्णयार्थे स मध्यस्थ-पदेऽभिषिक्तो भवति स्म।

पं. नेहरु-मन्त्रित्वकाले चीन-देशेन सह मैत्री **पञ्चशील**सिद्धान्तानधिकृत्य एवाभवत्। **पञ्चशील**मिति शिष्टाचार-विषयका: सिद्धान्ता:। आधुनिकयुगे पञ्चशीलसिद्धान्ता: नवीनं राजनैतिक-स्वरूपं गृहीतवन्त:। विश्वस्य यानि राष्ट्राणि शान्तिमिच्छन्ति,

www.thearyasamaj.org

तानीमान् सिद्धान्तानङ्गीकृत्य परराष्ट्रैः सार्धं स्वमैत्रीभावं दृढीकुर्वन्ति, परन्तु नेहरु-महाभागः पाकिस्तान-चीन-देशाभ्यां सह सम्बन्ध-स्थापने सफलतां न प्राप्तवान्, कश्मीर-समस्याऽद्यापि वर्तते। चीन-देशेन सह सीमा-विवादोऽधुनाऽपि विद्यते। द्विषष्ट्युत्तरैकोनविंशति-शततमे वर्षे (१९६२) चीन-देशो भारतस्योपरि छलेनाक्रमणमकरोत्। युद्ध-विरामस्य घोषणोपरान्तेऽपि तेन युद्धस्य समाप्तिर्न कृता। अयमेव नेहरु-महाभागस्य राजनैतिक-जीवने महान् दुर्दिवस आसीत्। तस्य सर्वकारस्य विरोधे प्रथमवारं संसदि **अविश्वास-प्रस्तावः** प्रस्तुतीकृतः।

पं. नेहरु-महाभागो न केवलं राजनीतिज्ञः प्रभावशाली वक्ता चासीदपितु स ख्यातिलब्धलेखकरूपेऽपि विश्वे प्रतिष्ठितोऽभवत्। तस्य '**आत्मकथा**' षड्त्रिंशदुत्तरैकोनविंशतिशततमे वर्षे (१९३६) प्रकाशिता जाता। तस्याः समादरो विभिन्न-देशवासिभिः कृतः। तेन '**डिस्कवरी आफ इण्डिया**' (भारत की खोज) नामक-ग्रन्थोऽपि विरचितो, यः सर्वत्र महतीं प्रसिद्धिमवाप।

स्वनत्रता-प्राप्तेः पश्चात् भारतेन विश्वशान्ति-कृते बहवः प्रयत्नाः विहिताः। नेहरु-महोदयेन नैकवारं संसारो युद्धविभीषिकातः संरक्षितः। डॉ. राधाकृष्णसर्वपल्लीमहाभागेन कथितं यद् स्वन्त्रता-सङ्गामस्य योद्धा-रूपे सः यशस्वी-महापुरुष आसीत्। आधुनिक-भारतस्य निर्माण-कृते च तस्यांश-दानमभूतपूर्वमेवासीत्।

पं. नेहरु-महाभागो बालकेषु मध्ये बालक इव समाचरति स्म। तैः सह स्नेहोऽनुरागः क्रीडनञ्च तस्मै बहुरोचन्ते स्म। अस्मादेव कारणाद् बालकाः बालिकाः युवानश्च तं '**चाचा**' इति शब्देन सम्बोधयन्ति स्म। अधुना तस्य जन्मदिवसो '**बालदिवस**' इति नाम्ना समायोज्यते।

स्वदेशी-भाषां प्रति तस्यास्थाऽऽसीत्। तेन कथितं यत्-

**'भारतवासिनां कृते राजकीय-कार्येषु विदेशी-भाषाया अङ्गीकरणं सर्वथाऽशोभनीयम्।'**

नेहरु-महाभागो धर्म-निरपेक्षतायाः समर्थक आसीत्। धर्मस्य पक्षं गृहीत्वा कृतो विरोधो राष्ट्रोत्थाने शान्तिमार्गे च व्यवधानं जनयतीति तस्य विश्वास आसीत्। '**राष्ट्र-निर्माण-कृते सर्वधर्मावलम्बिनां सहयोगो वाञ्छनीय**' इति तस्य विचार आसीत्।

परन्तु हन्त! सर्वगुणसम्पन्नः स्वतन्त्रता-सङ्गामस्य लोकप्रियो नायकः शान्तिदूतो नेहरु-महाभागोऽद्यास्माकं मध्ये न वर्तते। चतुष्षष्ट्यु-त्तरैकोनविंशतिशततमे वर्षे (१९६४) मई-मासस्य सप्तविंशतितमे दिनाङ्के सः स्वकीयं पार्थिव-शरीरं परित्यज्य दिवङ्गतः। सत्यमेवोक्तम्-

**जयन्ति ते महाभागाः जनसेवा-परायणाः।**
**जरा-मृत्यु-भयं नास्ति येषां कीर्त्तितनोः क्वचित्॥**

इति दिक्।

www.thearyasamaj.org



# ❋ त्रि–पथगा ❋

[ उत्तराखण्ड–संस्कृत–अकादमी–द्वारा अखिलभारतीय–समस्यापूर्ति–प्रतियोगितायां पुरस्कृता रचना ]

–डॉ. प्रकाशपन्तः 'दीपः'
सहायकाचार्यः, शिक्षाशास्त्रविभागे
उत्तराखण्ड–संस्कृत–विश्वविद्यालयः
हरिद्वारम् ( उत्तराखण्डम् )

(१)

कदाचिद्विष्णोर्या चरणकमलं चुम्बति मुदा,
कदाचिद् गङ्गेयं विधिकरगतापि प्रमुदिता।
पृथिव्यां सा देवी पशुपतिजटाभ्यः प्रकटिता,
विमुक्त्यर्थं माता सगरतनयानां त्रिपथगा॥

(२)

नगेन्द्रात् सम्भूता मुनिमनुजमान्या प्रतिदिनं,
ततः कान्तारं सा प्रविशति सनीरा सुर–सरित्।
पुनातीयं लोकं निखिलमथ संयाति जलधिं,
द्रुमाणां कूपानां भवति जननीयं त्रिपथगा॥

(३)

समग्रे देशेऽस्मिन् प्रवहति सलीलञ्च सलिलं,
धरित्रीयं पूर्णा खलु तव जलेनैव हरिता।
पिपासामस्माकं शमयति पशूनामपि तथा,
कृषि–क्षेत्राणां सेचनमपि करोति त्रिपथगा॥

(४)

इयं दिव्या देवी प्रभवति हिमाद्रेर्भगवती,
महाघं प्रक्षाल्य प्रवहति पवित्राऽवनितले।
यदीयं नीरं भूभृतमपि विदीर्य प्रवहति,
सदा पेया पूज्याः भवति स्थलभेयं त्रिपथगा॥

(५)

धरेयं धामाभूदयि! तव जलेन त्रिपथगे,
मुदा सेवन्ते ते सलिलमिह ये यान्ति पथिकाः।
सुधा–पानं यस्याः भवभयविनाशाय कथितं,
भवाब्धावस्मिन् या सरल–तरणिः का? त्रिपथगा॥

(६)

महापापानां क्षालनमिह करोति प्रतिदिनं,
विहारेणापीयं सुखयति जनान् भाव–भरितान्।
जगन्नाथो मुक्तः कविरपि यशोगाननिरतः,
कलौ कीर्त्या केयं? कविकुलकलापा त्रिपथगा॥

(७)

न जानेऽहं तत्त्वं न च किमपि शास्त्रं श्रुतिमहो,
परं जानेऽहं ते जननि भुवि शुद्धोदकमिदम्।
न काचित् स्यादीहा भुवि तव तटे मे विहरतो,
मुखे गाङ्गं नीरं भवतु हृदये मे त्रिपथगा॥

(८)

क्षिपन्तो दृश्यन्ते त्वयि जननि ये चाप्यवकरं,
वराकाः मूढास्ते किमपि न विजानन्ति मनुजाः।
नराणां त्वं तेषामघमपि समस्तं कलियुगे,
भवानि! प्रक्षाल्य प्रवहसि सदैव त्रिपथगे॥

www.thearyasamaj.org

(९)

प्रमादाद्यः कश्चिद्यदि किमपि सम्पातयति ना,
त्वदीये गर्भान्तस्तदपि ससुखं पालयसि तम् ।
कृपासिन्धुर्मातस्तव सलिलबिन्दुर्भगवति!,
त्रयाणां लोकानां त्वमिह जननी हे त्रिपथगे ॥

(१०)

यदीयं पीयूषं यवन-नृपतिस्सादरमहो,
सदा पीत्वा मुक्तस्सुविदितमिदं भारत-भुवि ।
पयो जन्मावृत्तिं हरति मनुजानां ध्रुवमिदं,
जगत्कृत्स्नं पायात् सुरसरिदियं मे त्रिपथगा ॥

(११)

तटे भागीरथ्या भवति यदि वासो मम सदा,
तदा मन्येहं यत् सफलमिति जन्माद्य वपुषः ।
असौ धन्यो यस्ते जननि नवगीतानि लिखति,
द्रुतं स्वर्गं याति प्रथितमिदमस्ति त्रिपथगे ॥

(१२)

स्वयं भस्मीभूतं भवति भुवि पापं यदि कृतं,
नराणां नारीणां प्रतिदिनमहो वारि पिबताम् ।
कथेयं ते मातः किल कलियुगे लोक-विदिता,
सुपूज्या पेया का सरस-रस-धारा त्रिपथगा ॥

(१३)

त्रयाणां देवानां गृहमपि यया क्षालितमहो,
मुनेर्जह्नोर्जाता किल कलिमलक्षालनरता ।
सरित् केयं? गङ्गा प्रवहति सभङ्गा समतले,
नदीनां राज्ञी का? विमल-सलिलेयं त्रिपथगा ॥

(१४)

नदीनां सर्वेषां विमल-सलिलं दूषितमहो,
कथं स्वच्छं स्यात् तज्जलमिह नदीनां कलियुगे।
यदा संकल्पोऽयं भवति मनुजानां हितकरः,
तदा स्वच्छं स्यात् सम्प्रति न हि जलं जीवनमिदम् ॥

(१५)

हिमाद्रिस्ते कीर्तिं भुवन-विदितो गायति सदा,
त्वमेवैका गेया कलिमलहरा सम्प्रति भुवि ।
कविर्दीपोऽयं ते लिखति गुणगीतिं त्रिपथगे,
गृहे नित्यं प्रातर्भुवि जननि गास्यन्ति मनुजाः ॥

•

## निशां कथं नयेयम्

-डॉ. वेदकुमारी
संस्कृतविभागः
जम्मूविश्वविद्यालयः, जम्मूतवी

(१)

हिमागमेऽहं विरहाग्नि-तप्ता,
दन्दह्यमाना च तदीय-तापैः।
निद्रा-विहीना त्वयि दत्त-चित्ता,
स्वामिन्! निशां हन्त! कथं नयेयम् ॥

(२)

स्थित्वा तु रात्रौ शयनीय-मध्ये,
बालश्च बालाश्च विलोकयन्ती।
स्मृत्वा त्वदीयं प्रियमाननं तत्,
स्वामिन्! निशां हन्त कथं नयेयम् ॥

•

www.thearyasamaj.org

# ❋ कालिदास-काव्येषु पर्यावरण-संरक्षण-चिन्तनम् (१) ❋

-डॉ. प्रकाशचन्द्रः पन्तः
सहायकाचार्यः, शिक्षाशास्त्रविभागे
उत्तराखण्ड-संस्कृत-विश्वविद्यालयः
हरिद्वारम् ( उत्तराखण्डम् )

**'शरीरमाद्यं खलु धर्म-साधनम्'** इति कालिदास-कवेः सूक्त्यनुसारं भवाब्धावपारे सर्वैः मानवैः शरीर-रक्षणार्थं यतनीयमिति। जगत्यस्मिन् को वा सुखं न वाञ्छति। स एव मनुष्यः सुखी भवति, यः स्वस्थः भवति। आधि-व्याधि-रहित-कायेन मनसा वा स्वस्थः कथ्यते। प्राणी तदेव सुखी स्वस्थः वा भवितुं शक्नोति, यदा तस्य पर्यावरणं शुद्धं शान्तञ्च स्यात्। अतो हेतोः पर्यावरण-शुद्धिः संरक्षणञ्च परमावश्यकमिति।

यदस्मान् परितः आवृणोति, आच्छादयति, तदेव पर्यावरणं नाम। एतदन्तः पृथिवीतलम्, तदुपरि स्थितं जलं, वायु-मण्डलं, वृक्ष-लता-पर्वत-नदी-वन्य-प्राणिनश्च समाविष्टाः। सर्वे प्राणिनः भौतिकमिदं पर्यावरणं समाश्रित्यैव जीवनं धारयन्ति। इदञ्च पर्यावरणं मानवकृत-घटनाभिर्विविध-क्रियाकलापैर्वा प्रभूतं प्रभावितं भवति।

साम्प्रतं न केवलं भारते किञ्च निखिलेऽपि विश्वे नैकाः समस्याः समुत्पन्नाः दृश्यन्ते। क्वचिदातङ्कवादः, क्वचित् प्रदूषणम्, क्वचित् बम्ब-विस्फोटनैः मानव-हिंसादयश्च। इदानीं सर्वे जनाः समस्यानां समाधान-चिन्तने रतास्सन्ति।

उपर्युक्तासु समस्यासु पर्यावरण-समस्या प्रमुखा वर्तते। यया प्रतिदिनं जनाः प्रभाविताः भवन्ति। उद्योग-शालाभिः जनसंख्या-वृद्ध्या च नदीनां पवित्रं जलमपि प्रदूषितं जातम्। वनानि छिद्यन्ते, येन शुद्धवायुर्नोपलभ्यते। सत्स्वपि नैकेषु पर्यावरण-घटकेषु जल-वायु-वनस्पत्यादय एव प्रमुखाः घटकाः भवन्ति। तत्रापि वनानां लता-पादपादीनां भवति प्रमुखं स्थानम्। यतो हि पादपैरेव शुद्ध-जलं मिलति, तेषामभावे शीतल-निर्मल-जलस्याभावो भवति। पादपैरेव जीवनस्याधारभूतः प्राणवायुः दीयते। स्वमातपे स्थित्वा तरवः प्राणिनां सन्तापं हरन्ति। वृक्षा एव अस्मभ्यं पत्राणि पुष्पाणि मधुराणि फलानि, काष्ठानि च ददति।

भारतीय-परम्परायां तु कदली-तुलसी-पिप्पल-वट-शमी-विल्व-धात्री-आम्र-अशोक-

www.thearyasamaj.org

उदम्बरादीनां तरूणां पूजनमपि क्रियते। तेन स्पष्टं भवति पादपानां महत्त्वं, भारतीयानां मनीषिणां कवीनां च पर्यावरण-संरक्षण-चिन्तनम्।

मनुष्या:, जीव-जन्तव:, पादपाश्च परस्परं घनिष्ठ-रूपेण सम्बद्धास्सन्ति। एकेन विनापरस्य जीवनं न सम्भवति। अत: पर्यावरण-रक्षार्थं काननानां संरक्षणं परमावश्यकं भवति। एतस्मादेव कारणाद् पूर्वं भारतीयै: ऋषिभिर्मुनिभिश्चाश्रमा: काननेष्वेव संस्थापिता आसन्।

अस्तु, वेदेषु वाल्मीकि-रामायणादारभ्य पुराण-साहित्ये तथा चान्येषां संस्कृत-कवीनां महाकवीनां च कृतिषु पर्यावरण-संरक्षण-चेतनाया: वर्णनं समुपलभ्यते। तेषु संस्कृत-कविषु कविकुलगुरुकालिदासस्य विशिष्टं स्थानं विद्यते। यथा महाकवे: कृतय: जगति प्रसिद्धा: सन्ति, तथैव तस्य पर्यावरण-प्रकृति-वर्णनमपि सुप्रसिद्धमेव। महाकवे: कालिदासस्य सर्वासु रचनासु पर्यावरण-संरक्षणं प्रदूषण-जन्य-हानयश्च दृष्टिपथमायान्ति। अत्र तावत् प्रथमं कवे: विश्व-प्रसिद्धे नाटके **'अभिज्ञान-शाकुन्तलम्'** इति नामधेये पर्यावरण-संरक्षणं पश्याम:। तदवलोकनीयम् -

## १. अभिज्ञानशाकुन्तलम् -

पर्यावरण-संरक्षणस्य प्रकृति-प्रेम्ण: च सर्वाधिकं सुन्दरं वर्णनं मया शाकुन्तले दृष्टम्, अत: प्रथममभिज्ञानशाकुन्तलस्येदं वर्णनं क्रियते। अत्र कविना प्रतिपादितमस्ति यत् पर्यावरण-रक्षणार्थं वृक्ष-सिञ्चनं नित्यकर्मसु प्रमुखमासीत्। तत्राश्रम-कन्यका: स्वानुरूप-सेचन-घटै: बाल-पादपान् सिञ्चन्ति। यथा-

**'राजा- एतास्तपस्विकन्यका: स्वप्रमाणानुरूपै: सेचन-घटै: बाल-पादपेभ्यो पयो दातुमित एवाभिवर्तन्ते ।'**[1]

अन्यत्रानुसूया शकुन्तलां कथयति यत्-

> **'हला शकुन्तले त्वत्तोऽपि तात-कण्वस्य आश्रम-वृक्षा: प्रियतरा: सन्ति, येन नवमालिका-कुसुम-पेलवाऽपि त्वमेतेषामालवालपूरणे नियुक्ता ।'**

सख्या वाचमिमां निशम्य शकुन्तला यद् वदति, तेन महाकवे: कालिदासस्य पर्यावरणं प्रति जागरूकताया: परिज्ञानं भवति। शकुन्तला न केवलं तात-कण्वस्य नियोग एव, अस्ति मे सहोदर-स्नेहोऽप्येतेषु[2]।'

अग्रे नाटकस्य नायिका भूषण-प्रियाऽपि सती पादपानां पत्रमेकं नात्रोटयत्। सा खलु यावद् आश्रमस्थान् तरून् न सिञ्चति, तावत् न स्वयमपि जलं पिबति। वृक्षेषु पुष्प-फलोद्गमे यस्या: महानुत्सवो भवति। अनेन हृदयावर्जकेन प्रकृति-प्रेम-वर्णनेन प्रकृति-कवे: पर्यावरण-चेतनैव प्रस्फुटिता भवति। महर्षि-कण्व: कथयति-

---

१. अभिज्ञानशाकुन्तलम् १-४५

२. अभिज्ञानशाकुन्तलम् (प्रथमाङ्क)

www.thearyasamaj.org

पातुं न प्रथमं व्यवस्यति जलं युष्माष्वपीतेषु या,
नाऽऽदत्ते प्रियमण्डनाऽपि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुम-प्रसूति-समये यस्याः भवत्युत्सवः,
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्[३] ॥

शकुन्तलायाः पति-गृह-गमन-समये शीतल-मन्द-सुगन्ध-पवनः कल्याणं कुर्यादिति कामना कृता दृश्यते। यथा –

रम्यान्तरः कमलिनी-हरितैः सरोभि-,
छाया-द्रुमैर्नियमितार्कमयूखतापाः।
भूयात् कुशेशयरजो मृदुरेणुरस्याः,
शान्तानुकूलपवनश्च शिवश्च पन्थाः[४] ॥

शकुन्तलायाः अव्याजमनोहरवपुषि प्रमुग्धो राजा दुष्यन्तः तां शकुन्तलां दुष्कर-तपस्यायां नियोक्तारं कण्वमसाधुदर्शीति चिन्तयन्, तस्याः सौन्दर्य-पानं कर्तुं वृक्षस्य पृष्ठतः तिष्ठति, शकुन्तला वदति सखीं प्रति-

'यदेष वातेरित-पल्लवाङ्गुलीभिस्त्वरयतीव मां केसर-वृक्षकः प्रतिभाति।[५]'

किमर्थं त्वरयति वृक्षः? सख्यौ शकुन्तलां वदतः यत् –

'हला शकुन्तले अत्रैव तावन्मुहूर्त्तं तिष्ठ, यावत्त्वयोपगतया लता-सनाथ इव केसर-वृक्षकः प्रतिभाति[६]।'

अत्रापि कवेः पादप-मानवयोः परस्परं प्रगाढः सम्बन्धोऽस्तीति ज्ञापितम्। इत्थं मानवाः यदि पादपैः सह बन्धुत्व-भावनया स्थास्यन्ति चेत् कदापि पर्यावरण-समस्या नैव भवितुमर्हति। पुनरग्रे च शकुन्तला लतयोस्तादात्म्यं सजीव-वर्णनं कविरनुसूया-मुखेन चित्रयति –

'अनुसूया कथं त्वं वन-ज्योत्स्नेति नाम कृतायाः लतायाः सिञ्चनं विस्मरसि[७]?'

तदा शकुन्तला तामुत्तरयति-

'तदा आत्मानमपि विस्मरिष्यामि, हला रमणीये खलु काले एतस्य लता-पादप-मिथुनस्य व्यतिकरः संवृत्तः। नवकुसुमयौवना वन-ज्योत्स्ना बद्धफलतयोपभोगक्षमः सहकारः[८]।'

अग्रे पुनः शकुन्तला वन-ज्योत्स्ना नाम लतया सह वार्तालापं कुर्वन्ती प्रकृति-प्रेम प्रदर्शयति। यथा-

'वन-ज्योत्स्ने चूत-सङ्गतापि मां प्रत्यालिङ्गत इतो गताभिः बहु-शाखाभिः अद्य प्रभृति दूरवर्तिनी ते भविष्यामि[९]।'

वन-ज्योत्स्ना-लता-शकुन्तलयोः निर्विशेषं भगिनीत्वं कालिदासस्य पर्यावरण-चिन्तनं च कण्वस्य कथनेनानेन प्रमाणितं भवति यत्-

---

३. अभिज्ञानशाकुन्तलम् ४/९
४. अभिज्ञानशाकुन्तलम् ४-११
५. अभिज्ञानशाकुन्तलम् (प्रथमाङ्के)
६. अभिज्ञानशाकुन्तलम् (प्रथमाङ्के)
७. अभिज्ञानशाकुन्तलम् (प्रथमाङ्के)
८. अभिज्ञानशाकुन्तलम् (प्रथमाङ्के)
९. अभिज्ञानशाकुन्तलम् (चतुर्थाङ्के)

'सङ्कल्पितं प्रथममेव मया तवार्थे,
भर्तारमात्मसदृशं सुकृतैर्गता त्वम्।
चूतेन संश्रितवती नवमालिकेय-
मस्यामहं त्वयि च सम्प्रति-वीतचिन्त:[१०]॥

शकुन्तलाया: गमन-समये न केवलं तपोवन-वासिन: दुखिता:, अपितु तत्रत्या: जीव-जन्तवोऽपि भृशं दुखमन्वभवन्, तत्र प्रियंवदा कथयति -

उद्गलितदर्भकवला: मृगा:, परित्यक्तनर्तना: मयूरा:।
अपसृत-पाण्डुपत्रा मुञ्चन्त्यश्रुणीव लता:[११]॥

पर्यावरण-संरक्षणे यज्ञस्य महत्त्वमपि न्यूनतरं नास्ति। अत: कालिदास-रचनासु यज्ञादि-वर्णनं प्रायश: सर्वत्र मिलति। शाकुन्तले यथा-

'सायन्तने सवन-कर्मणि संप्रवृत्ते,
वेदीं हुताशनवतीं परित: प्रयस्ता:[१२]।'

पर्यावरण-शुद्धतायै सन्तुलनाय च वन्यजीवानां पशूनां वा महत्त्वपूर्णं योगदानं भवति, अतस्तेषां संरक्षणं परमावश्यकं भवति। कालिदासस्य शाकुन्तले द्विप-सिंह-गो-मृगादि-पशूनां संरक्षणेन हिंसाया: पर्यावरणस्य च सन्देश: प्रदत्तो वर्तते-

'भो भो राजन्! आश्रम-मृगोऽयं न हन्तव्यो न हन्तव्य:[१३]।'

एकत्र राजा दुष्यन्त: कथयति यत् शकुन्तलया सह कालं यापितवन्तं मृगं हन्तुं मम धनु: न चलतीव। यथा-

न नमयितुमधिज्यमस्मि शक्तो,
धनुरिदमाहितसायकं मृगेषु।
सह वसतिमुपेत्य यै: प्रियाया:,
कृत इव मुग्धविलोकितोपदेश:[१४]॥

शकुन्तला मृग-शावकं पुत्रवत् स्निह्यति, तस्य सजीवं हृदय-स्पर्शी वर्णनं कविना कृतमस्ति। पद्यमिदं द्रष्टव्यम्-

यस्य त्वया व्रणविरोपणमिङ्गुदीनां,
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टिपरिवर्धितको जहाति,
सोऽयं न पुत्र-कृतक: पदवीं मृगस्ते[१५]॥

इत्थमभिज्ञानशाकुन्तले नैकेषु स्थलेषु महाकवे: कालिदासस्य मार्मिक-शब्देषु पर्यावरण-संरक्षिकाया: शकुन्तलाया: उदात्तं चरित्रं वर्णितं दरीदृश्यते।

## २. रघुवंशमहाकाव्यम् -

सुप्रथितमिदं महाकवे: कालिदासस्य महाकाव्यं रघुवंशं नाम। अस्मिन् महाकाव्ये

---

१०. अभिज्ञानशाकुन्तलम् ४/१३
११. अभिज्ञानशाकुन्तलम् ४/२१
१२. अभिज्ञानशाकुन्तलम् ३/२३
१३. अभिज्ञानशाकुन्तलम् (प्रथमाङ्क)
१४. अभिज्ञानशाकुन्तलम् २/३
१५. अभिज्ञानशाकुन्तलम् ४/१४

www.thearyasamaj.org



सूर्यवंशीय-नृपाणां वर्णनं वर्तते। द्वितीये सर्गे सः राज्ञः दिलीपस्य गोसेवायाः हृदयावर्जकं वर्णनमुपस्थापयति। राजा दिलीपः वशिष्ठाश्रमे सपत्नीकः निवासं कुर्वन् वशिष्ठ-धेनोर्नन्दिन्याः सेवकत्वेन प्रत्यहं वनं गच्छति स्म। तत्र केचित्तरवः त्रिविधं वायुं सञ्चार्य तस्य राज्ञः तापं हरन्ति। तद्यथा-

'पृक्तस्तुषारैर्गिरिनिर्झराणा-
मनोकहा कम्पित-पुष्प-गन्धी।
तमातप-क्लान्तमनातपत्र-
माचारपूतं पवनः सिषेवे[16]॥'

केचिच्च वृक्षाः वन-देवताभिः राज्ञः यशोगाने साहाय्यं कुर्वन्ति। पद्यमेकं यथा-

'स कीचकैर्मारुत-पूर्णरन्ध्रैः,
कूजद्भिरापादित-वंशकृत्यम्।
शुश्राव कुञ्जेषु यशः स्वमुच्चै-
रुद्गीयमानं वन-देवताभिः[17]॥'

वने धेनु सेवा-रतस्य राज्ञः दिलीपस्य श्रद्धां भक्तिञ्च विलोक्य पादपाः तस्य गुण-गानं कुर्वन्ति।

हरिद्वार-स्थितस्य ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य मुखपत्रम्
भारतोदयः (संस्कृत-मासिकम्)
P.O. गुरुकुलकाङ्गड़ी-२४९४०४
हरिद्वारम् (उत्तराखण्डम्)
सेवायाम्
श्री........................

यथा-

'विसृष्टपार्श्वानुचरस्य तस्य,
पार्श्वद्रुमा पाशभृता समस्य।
प्रदीरयामासुरिवोन्मदाना-
मालोकशब्दं वयसां विरावैः[18]॥'

[ क्रमशः ]

१६. रघुवंशमहाकाव्यम् २/१३
१७. रघुवंशमहाकाव्यम् २/१२
१८. रघुवंशमहाकाव्यम् २/०९

मुद्रकेण,प्रकाशकेनडॉ. हरिगोपालशास्त्रिणा ज्वालापुर-स्थिते'न्यू जे.एन. स्टेशनरी मार्ट' नामकंमुद्रणालयं मुद्रापयित्वा' भारतोदयः' मासिकंपत्रंप्राकाश्यंनीतंहरिद्वार-स्थितयाज्वालापुरीय-गुरुकुलमहाविद्यालय-सभया।
सम्पादकः डॉ. हरिगोपालशास्त्री